॥ सौन्दर्यलहरी ॥

आनन्दलहरी

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
न चेत् एवं देवो न खलु कुशलः स्पन्दितु–मपि ।
अतस्त्वामाराध्यां हरि–हर–विरिञ्चादिभि–रपि
प्रणन्तुं स्तोतुं वा कथ–मकृतपुण्यः प्रभवति ॥ 1॥
तनीयांसं पांसुं तव चरण–पङ्केरुह–भवं
विरिञ्चि–स्सञ्चिन्वन् विरचयति लोका–नविकलम् ।
वहत्येनं शौरिः कथमपि सहस्रेण शिरसां
हरः संक्षुद्यैनं भजति भसितोद्धूलन–विधिम् ॥ 2॥
अविद्याना–मन्त–स्तिमिर–मिहिर–द्वीपनगरी
जडानां चैतन्य–स्तबक–मकरन्द–स्रुतिझरी ।
दरिद्राणां चिन्तामणि–गुणनिका जन्मजलधौ
निमग्नानां दंष्ट्रा मुररिपु–वराहस्य भवति ॥ 3॥
त्वदन्यः पाणिभ्यां अभयवरदो दैवतगणः
त्वमेका नैवासि प्रकटित–वराभीत्यभिनया ।

भयात् त्रातुं दातुं फलमपि च वाञ्छासमधिकं
   शरण्ये लोकानां तव हि चरणावेव निपुणौ ॥ 4॥
हरिस्त्वा–माराध्य प्रणत–जन–सौभाग्य–जननीं
   पुरा नारी भूत्वा पुररिपुमपि क्षोभं–अनयत् ।
स्मरोऽपि त्वां नत्वा रति–नयन–लेह्येन वपुषा
   मुनीना–मप्यन्तः प्रभवति हि मोहाय महताम् ॥ 5॥
धनुः पौष्पं मौर्वी मधुकरमयी पञ्च विशिखाः
   वसन्तः सामन्तो मलयमरु–दायोधन–रथः ।
तथाप्येकः सर्वं हिमगिरिसुते कामपि कृपां
   अपांगात्ते लब्ध्वा जगदिद–मनङ्गो विजयते ॥ 6॥
क्वणत् काञ्चीदामा करिकलभ–कुंभ–स्तन–नता
   परिक्षीणा मध्ये परिणत शरच्चन्द्र–वदना ।
धनुर्बाणान् पाशं सृणि–मपि दधाना करतलैः
   पुरस्तादास्तां नः पुरमथितु–राहो–पुरुषिका ॥ 7॥
सुधासिन्धोर्–मध्ये सुरविटपि–वाटी–परिवृते
   मणिद्वीपे नीपो उपवनवति चिन्तामणि–गृहे ।
शिवाकारे मञ्चे परमशिव–पर्यङ्क–निलयां
   भजन्ति त्वां धन्याः कतिचन चिदानन्द–लहरीम् ॥ 8॥
महीं मूलाधारे कमपि मणिपूरे हुतवहं
   स्थितं स्वाधिष्ठाने हृदि मरुत–माकाश–मुपरि ।
मनोऽपि भ्रूमध्ये सकलमपि भित्वा कुलपथं
   सहस्रारे पद्मे सह रहसि पत्या विहरसे ॥ 9॥

सुधाधारासारैः चरणयुगलान्तर्–विगलितैः
प्रपञ्चं सिञ्चन्ती पुनरपि रसाम्नाय महसः ।
अवाप्य स्वां भूमिं भुजगनिभ–मध्युष्ट–वलयं
स्वमात्मानं कृत्वा स्वपिषि कुलकुण्डे कुहरिणि ॥ 10॥
चतुर्भिः श्रीकण्ठैः शिवयुवतिभिः पञ्चभिरपि
प्रभिन्नाभिः शंभोः नवभिरपि मूलप्रकृतिभिः ।
चतुश्चत्वारिंशद्–वसुदल–कलाश्र–त्रिवलय
त्रिरेखाभिः सार्धं तव शरणकोणाः परिणताः ॥ 11॥
त्वदीयं सौन्दर्यं तुहिनगिरिकन्ये तुलयितुं
कवीन्द्राः कल्पन्ते कथमपि विरिञ्चि–प्रभृतयः ।
यदालोकौत्सुक्याद् अमरललना यान्ति मनसा
तपोभिर्–दुष्प्रापामपि गिरिश–सायुज्य–पदवीम् ॥ 12॥
नरं वर्षीयांसं नयनविरसं नर्मसु जडं
तवापाङ्गालोके पतित–मनुधावन्ति शतशः ।
गलद्वेणीबन्धाः कुचकलश–विस्रस्त–सिचया
हठात् त्रुव्यत्–काञ्च्यो विगलित–दुकूला युवतयः ॥ 13॥
क्षितौ षट्पञ्चाशद् द्विसमधिक–पञ्चाश–दुदके
हुताशे द्वाषष्टिः चतुरधिक–पञ्चाश–दनिले ।
दिवि द्विः षट्त्रिंशन्–मनसि च चतुष्षष्टिरिति ये
मयूखास्–तेषा–मप्युपरि तव पादांबुज–युगम् ॥ 14॥
शरज्–ज्योत्स्ना–शुद्धां शशियुत–जटाजूट–मकुटां
वर–त्रास–त्राण–स्फटिक–घुटिका–पुस्तक–कराम् ।

सकृन्न–त्वा नत्वा कथमिव सतां सन्निदधते
मधु–क्षीर–द्राक्षा–मधुरिम–धुरीणाः फणितयः ॥ 15॥
कवीन्द्राणां चेतः कमलवन–बालातप–रुचिं
भजन्ते ये सन्तः कतिचिदरुणां–एव भवतीम् ।
विरिञ्चि–प्रेयस्याः तरुणतर–श्रृङ्गारलहरी
गभीराभिर्–वाग्भिः विदधति सतां–रञ्जनममी ॥ 16॥
सवित्रीभिर्–वाचां शशि–मणि–शिला–भङ्गरुचिभिः
वशिन्याद्याभिस्–त्वां सह जननि संचिन्तयति यः ।
स कर्ता काव्यानां भवति महतां भङ्गिरुचिभिः
वचोभिर्–वाग्देवी–वदन–कमलामोद–मधुरैः ॥ 17॥
तनुच्छायाभिस्–ते तरुण–तरणि–श्रीसरणिभिः
दिवं सर्वां उर्वीं अरुणिमनिमग्नां स्मरति यः ।
भवन्त्यस्य त्रस्यद्–वनहरिण–शालीन–नयनाः
सहोर्वश्या वश्याः कति कति न गीर्वाण–गणिकाः ॥ 18॥
मुखं बिन्दुं कृत्वा कुचयुगमधस्–तस्य तदधो
हरार्धं ध्यायेद्यो हरमहिषि ते मन्मथकलाम् ।
स सद्यः संक्षोभं नयति वनिता इत्यतिलघु
त्रिलोकी–मप्याशु भ्रमयति रवीन्दु–स्तनयुगाम् ॥ 19॥
किरन्ती–मङ्गेभ्यः किरण–निकुरुंबामृतरसं
हृदि त्वा–माधत्ते हिमकर–शिला–मूर्तिमिव यः ।
स सर्पाणां दर्पं शमयति शकुन्ताधिप इव
ज्वरप्लुष्टान्–दृष्ट्या सुखयति सुधासार–सिरया ॥ 20॥

तटिल्लेखा–तन्वीं तपन–शशि–वैश्वानर–मयीं
निषण्णां षण्णा–मप्युपरि कमलानां तव कलाम् ।
महापद्माटव्यां मृदित–मलमायेन मनसा
महान्तः पश्यन्तो दधति परमाह्लाद–लहरीम् ॥ 21॥
भवानि त्वं दासे मयि वितर दृष्टिं सकरुणां
इति स्तोतुं वाञ्छन् कथयति भवानि त्वमिति यः ।
तदैव त्वं तस्मै दिशसि निज–सायुज्य–पदवीं
मुकुन्द–ब्रह्मेन्द्र–स्फुट–मकुट–नीराजित–पदाम् ॥ 22॥
त्वया हृत्वा वामं वपु–रपरि–तृप्तेन मनसा
शरीरार्धं शंभोः अपरमपि शङ्के हृतमभूत् ।
यदेतत्–त्वद्रूपं सकल–मरुणाभं त्रिनयनं
कुचाभ्या–मानम्रं कुटिल–शशि–चूडाल–मकुटम् ॥ 23॥
जगत्सूते धाता हरिरवति रुद्रः क्षपयते
तिरस्कुर्वन्नेतत् स्वमपि वपु–रीशस्–तिरयति ।
सदा–पूर्वः सर्वं तदिद–मनुगृह्णाति च शिवः
तवाज्ञा–मालंब्य क्षणचलितयोर्–भ्रूलतिकयोः ॥ 24॥
त्रयाणां देवानां त्रिगुण–जनितानां तव शिवे
भवेत् पूजा पूजा तव चरणयोर्–या विरचिता ।
तथा हि त्वत्–पादोद्वहन–मणिपीठस्य निकटे
स्थिता ह्येते शश्वन् मुकुलित–करोत्तंस–मकुटाः ॥ 25॥
विरिञ्चिः पञ्चत्वं व्रजति हरिराप्नोति विरतिं
विनाशं कीनाशो भजति धनदो याति निधनम् ।

वितन्द्री माहेन्द्री विततिरपि संमीलित दृशा
　महा–संहारेऽस्मिन् विहरति सति त्वत्पति–रसौ ॥ 26॥
जपो जल्पः शिल्पं सकलमपि मुद्राविरचना
　गतिः प्रादक्षिण्य–क्रमणं–अशनाद्याहुति–विधिः ।
प्रणामः संवेशः सुखमखिल–मात्मार्पण–दृशा
　सपर्या–पर्यायस्–तव भवतु यन्मे विलसितम् ॥ 27॥
सुधा–मप्यास्वाद्य प्रतिभय–जरामृत्यु–हरिणीं
　विपद्यन्ते विश्वे विधि–शतमखाद्या दिविषदः ।
कराळं यत्–क्ष्वेळं कबलितवतः कालकलना
　न शंभोस्–तन्मूलं तव जननि ताटङ्क–महिमा ॥ 28॥
किरीटं वैरिञ्चं परिहर पुरः कैटभभिदः
　कठोरे कोटीरे स्खलसि जहि जंभारि–मकुटम् ।
प्रणम्रेष्वेतेषु प्रसभ–मुपयातस्य भवनं
　भवस्याभ्युत्थाने तव परिजनोक्तिर्–विजयते ॥ 29॥
स्वदेहोद्भूताभिर्–घृणिभि–रणिमाद्याभि–रभितो
　निषेव्ये नित्ये त्वां अहमिति सदा भावयति यः ।
किमाश्चर्यं तस्य त्रिनयन–समृद्धिं तृणयतो
　महासंवर्ताग्निर्–विरचयति नीराजन–विधिम् ॥ 30॥
चतुःषष्ट्या तन्त्रैः सकल–मतिसन्धाय भुवनं
　स्थितस् तत्तत्–सिद्धिः प्रसव–पर तन्त्रैः पशुपतिः ।
पुनस्त्व–न्निर्बन्धात् अखिल–पुरुषार्थैक–घटना
　स्वतन्त्रं ते तन्त्रं क्षितितल–मवातीतर–दिदम् ॥ 31॥

शिवः शक्तिः कामः क्षितिरथ रविः शीतकिरणः
स्मरो हंसः शक्रः तदनु च परामारहरयः ।
अमी हृल्लेखाभिः तिसृभि-रवसानेषु घटिता
भजन्ते वर्णास्ते तव जननि नामावयवताम् ॥ 32॥
स्मरं योनिं लक्ष्मीं त्रितय-मिद-मादौ तव मनोः
निधायैके नित्ये निरवधि-महाभोग-रसिकाः ।
भजन्ति त्वां चिन्तामणि-गुण निबद्धाक्ष-वलयाः
शिवाग्नौ जुह्वन्तः सुरभिघृत-धाराहुति-शतैः ॥ 33॥
शरीरं त्वं शंभोः शशि-मिहिर-वक्षोरुह-युगं
तवात्मानं मन्ये भगवति नवात्मान-मनघम् ।
अतः-शेषश्शेषीत्ययं उभय-साधारणतया
स्थितः संबन्धो वां समरस-परानन्द-परयोः ॥ 34॥
मनस्त्वं व्योम त्वं मरुदसि मरुत्-सारथिरसि
त्वमापस्-त्वं भूमिः त्वयि परिणतायां न हि परम् ।
त्वमेव स्वात्मानं परिणमयितुं विश्व-वपुषा
चिदानन्दाकारं शिवयुवति भावेन बिभृषे ॥ 35॥
तवाज्ञा-चक्रस्थं तपन-शशि-कोटि-द्युतिधरं
परं शंभुं वन्दे परिमिलित-पार्श्वं परचिता ।
यमाराध्यन् भक्त्या रवि-शशि-शुचीना-मविषये
निरालोकेऽलोके निवसति हि भालोक-भुवने ॥ 36॥
विशुद्धौ ते शुद्धस्फटिक-विशदं व्योम-जनकं
शिवं सेवे देवीमपि शिवसमान-व्यवसिताम् ।

ययोः कान्त्या यान्त्याः शशिकिरण–सारूप्यसरणेः
विधूतान्तर्–ध्वान्ता विलसति चकोरीव जगती ॥ 37॥
समुन्मीलत् संवित् कमल–मकरन्दैक–रसिकं
भजे हंसद्वन्द्वं किमपि महतां मानसचरम् ।
यदालापा–दष्टादश–गुणित–विद्यापरिणतिः
यदादत्ते दोषाद् गुणमखिल–मद्भ्यः पय इव ॥ 38॥
तव स्वाधिष्ठाने हुतवह–मधिष्ठाय निरतं
तमीडे संवर्तं जननि महतीं तां च समयाम् ।
यदालोके लोकान् दहति महति क्रोध–कलिते
दयार्द्रा या दृष्टिः शिशिर–मुपचारं रचयति ॥ 39॥
तटित्त्वन्तं शक्त्या तिमिर–परिपन्थि–स्फुरणया
स्फुरन्–नानारत्नाभरण–परिणद्धेन्द्र–धनुषम् ।
तव श्यामं मेघं कमपि मणिपूरैक–शरणं
निषेवे वर्षन्तं हरमिहिर–तप्तं त्रिभुवनम् ॥ 40॥
तवाधारे मूले सह समयया लास्य–परया
नवात्मानं मन्ये नवरस–महाताण्डव–नटम् ।
उभाभ्या–मेताभ्यां उदय–विधि–मुद्दिश्य दयया
सनाथाभ्यां जज्ञे जनकजननीमत्–जगदिदम् ॥ 41॥

<u>सौन्दर्यलहरी</u>

गतैर्–माणिक्यत्वं गगनमणिभिः सान्द्र–घटितं
किरीटं ते हैमं हिमगिरिसुते कीर्तयति यः ।

स नीडेयच्छाया–च्छुरणशबलं चन्द्र–शकलं
धनुः शौनासीरं किमिति न निबध्नाति धिषणाम् ॥ 42॥
धुनोतु ध्वान्तं नस्–तुलित–दलितेन्दीवर–वनं
घन–स्निग्ध–श्लक्ष्णं चिकुर–निकुरुंबं तव शिवे ।
यदीयं सौरभ्यं सहज–मुपलब्धुं सुमनसो
वसन्त्यस्मिन् मन्ये वलमथन–वाटी–विटपिनाम् ॥ 43॥
तनोतु क्षेमं न–स्तव वदन–सौन्दर्यलहरी
परीवाहस्रोतः सरणिरिव सीमन्तसरणिः ।
वहन्ती सिन्दूरं प्रबलकबरी–भार–तिमिर–
द्विषां बृन्दैर्–बन्दीकृतमिव नवीनार्क–किरणम् ॥ 44॥
अरालैः स्वाभाव्याद् अलिकलभ–सश्रीभि–रलकैः
परीतं ते वक्त्रं परिहसति पङ्केरुह–रुचिम् ।
दरस्मेरे यस्मिन् दशनरुचि–किञ्जल्क–रुचिरे
सुगन्धौ माद्यन्ति स्मरदहन–चक्षुर्–मधुलिहः ॥ 45॥
ललाटं लावण्य–द्युति–विमल–माभाति तव यत्
द्वितीयं तन्मन्ये मकुट–घटितं चन्द्रशकलम् ।
विपर्यास–न्यासाद्–उभयमपि संभूय च मिथः
सुधालेपस्यूतिः परिणमति राका–हिमकरः ॥ 46॥
भ्रुवौ भुग्ने किञ्चिद् भुवन–भय–भङ्ग–व्यसनिनि
त्वदीये नेत्राभ्यां मधुकर–रुचिभ्यां धृत–गुणम् ।
धनुर्–मन्ये सव्येतरकर–गृहीतं रतिपतेः
प्रकोष्ठे मुष्टौ च स्थगयति निगूढान्तर–मुमे ॥ 47॥

अहः सूते सव्यं तव नयन–मर्कात्मकतया
  त्रियामां वामं ते सृजति रजनी नायकतया ।
तृतीया ते दृष्टिः दरदलित–हेमांबुज–रुचिः
  समाधत्ते सन्ध्यां दिवस–निशयो–रन्तरचरीम् ॥ 48॥
विशाला कल्याणी स्फुटरुचि–रयोध्या कुवलयैः
  कृपाधारा धारा किमपि मधुराऽऽभोगवतिका।
अवन्ती दृष्टिस्ते बहुनगर–विस्तार–विजया
  ध्रुवं तत्तन्नाम–व्यवहरण–योग्या विजयते ॥ 49॥
कवीनां सन्दर्भ–स्तबक–मकरन्दैक–रसिकं
  कटाक्ष–व्याक्षेप–भ्रमर–कलभौ कर्णयुगलम् ।
अमुञ्चन्तौ दृष्ट्वा तव नवरसास्वाद–तरलौ
  असूया–संसर्गात्–अलिकनयनं किञ्चिदरुणम् ॥ 50॥
शिवे शृङ्गारार्द्रा तदितरजने कुत्सनपरा
  सरोषा गङ्गायां गिरिशचरिते विस्मयवती ।
हराहिभ्यो भीता सरसिरुह–सौभाग्य–जननी
  सखीषु स्मेरा ते मयि जननि दृष्टिः सकरुणा ॥ 51॥
गते कर्णाभ्यर्णं गरुत इव पक्ष्माणि दधती
  पुरां भेत्तुश्चित्तः प्रशम–रस–विद्रावण–फले ।
इमे नेत्रे गोत्राधरपति–कुलोत्तंस–कलिके
  तवाकर्णाकृष्टः स्मरशर–विलासं कलयतः ॥ 52॥
विभक्त–त्रैवर्ण्यं व्यतिकरित–लीलाञ्जनतया
  विभाति त्वन्नेत्र–त्रितय–मिद–मीशानदयिते ।

पुनः स्रष्टुं देवान् द्रुहिण–हरि–रुद्रानुपरतान्
रजः सत्त्वं बिभ्रत् तम इति गुणानां त्रयमिव ॥ 53॥

पवित्री–कर्तुं नः पशुपति–पराधीन–हृदये
दयामित्रैर्–नेत्रैः अरुण–धवल–श्याम–रुचिभिः ।
नदः शोणो गङ्गा तपन–तनयेति ध्रुवममुं
त्रयाणां तीर्थाना–मुपनयसि संभेद–मनघम् ॥ 54॥

निमेषोन्मेषाभ्यां प्रलय–मुदयं याति जगती
तवेत्याहुः सन्तो धरणिधर–राजन्यतनये ।
त्वदुन्मेषाज्जातं जगदिद–मशेषं प्रलयतः
परित्रातुं शङ्के परिहृत–निमेषास्–तव दृशः ॥ 55॥

तवापर्णे कर्णे जपनयन–पैशुन्य–चकिताः
निलीयन्ते तोये नियत–मनिमेषाः शफरिकाः ।
इयं च स्रीर्–बद्धच्छद–पुटकवाटं कुवलयं
जहाति प्रत्यूषे निशि च विघटय्य प्रविशति ॥ 56॥

दृशा द्राघीयस्या दरदलित–नीलोत्पल–रुचा
दवीयांसं दीनं स्नपय कृपया मामपि शिवे ।
अनेनायं धन्यो भवति न च ते हानिरियता
वने वा हर्म्ये वा समकर–निपातो हिमकरः ॥ 57॥

अरालं ते पालीयुगल–मगराजन्य–तनये
न केषामाधत्ते कुसुमशर–कोदण्ड–कुतुकम् ।
तिरश्चीनो यत्र श्रवणपथ–मुल्लङ्घ्य विलसन्
अपाङ्ग–व्यासङ्गो दिशति शरसन्धान–धिषणाम् ॥ 58॥

स्फुरद्गण्डाभोग–प्रतिफलित–ताटङ्कयुगलं
चतुश्चक्रं मन्ये तव मुखमिदं मन्मथरथम् ।
यमारुह्य द्रुह्यत्यवनिरथं अर्केन्दु–चरणं
महावीरो मारः प्रमथपतये सज्जितवते ॥ 59॥
सरस्वत्याः सूक्ती–रमृतलहरी–कौशलहरीः
पिबन्त्याः शर्वाणि श्रवण–चुलुकाभ्या–मविरलम् ।
चमत्कार–श्लाघा चलित–शिरसः कुण्डलगणो
झणत्कारैस्–तारैः प्रतिवचन–माचष्ट इव ते ॥ 60॥
असौ नासावंश–स्तुहिनगिरिवंश–ध्वजपटि
त्वदीयो नेदीयः फलतु फल–मस्माक–मुचितम् ।
वहत्यन्तर्–मुक्ताः शिशिरकर–निश्वास–गलितं
समृद्ध्या यस्तासां बहिरपि च मुक्तामणिधरः ॥ 61॥
प्रकृत्याऽऽरक्तायास्–तव सुदति दन्तच्छदरुचेः
प्रवक्ष्ये सादृश्यं जनयतु फलं विद्रुमलता ।
न बिंबं त्वद्बिंब–प्रतिफलन–रागादरुणितं
तुला–मध्यारोढुं कथमिव विलज्जेत कलया ॥ 62॥
स्मितज्योत्स्नाजालं तव वदन–चन्द्रस्य पिबतां
चकोराणां–आसीद् अतिरसतया चञ्चु–जडिमा ।
अतस्ते शीतांशो–रमृतलहरीं–आम्लरुचयः
पिबन्ति स्वच्छन्दं निशि निशि भृशं काञ्जिकधिया ॥ 63॥
अविश्रान्तं पत्युः गुणगण–कथाम्रेडनजपा
जपापुष्पच्छाया तव जननि जिह्वा जयति सा ।

यदग्रासीनाया: स्फटिकदृष–दच्छच्छविमयी
सरस्वत्या मूर्ति: परिणमति माणिक्य–वपुषा ॥ 64॥
रणे जित्वा दैत्यान्–अपहृत–शिरस्त्रै: कवचिभि:
निवृत्तै–श्चण्डांश: त्रिपुरहर–निर्माल्य–विमुखै: ।
विशाखेन्द्रोपेन्द्रै: शशिविशद–कर्पूरशकला
विलीयन्ते मात: तव वदन–तांबूल–कबला: ॥ 65॥
विपञ्च्या गायन्ती विविध–मपदानं पशुपते:
त्वयारब्धे वक्तुं चलितशिरसा साधुवचने ।
तदीयैर्–माधुर्यै: अपलपित–तन्त्री–कलरवां
निजां वीणां वाणी निचुलयति चोलेन निभृतम् ॥ 66॥
कराग्रेण स्पृष्टं तुहिनगिरिणा वत्सलतया
गिरीशेनोदस्तं मुहु–रधरपानाकुलतया ।
करग्राह्यं शंभो: मुखमुकुरवृन्तं गिरिसुते
कथङ्कारं ब्रूम:–तव चुबुक–मौपम्य–रहितम् ॥ 67॥
भुजाश्लेषान् नित्यं पुरदमयितु: कण्टकवती
तव ग्रीवा धत्ते मुखकमलनाल–श्रियमियम् ।
स्वत: श्वेता कालागरु–बहुल–जंबाल–मलिना
मृणाली–लालित्यं वहति यदधो हारलतिका ॥ 68॥
गले रेखास्तिस्रो गति–गमक–गीतैक–निपुणे
विवाह–व्यानद्ध प्रगुणगुण–संख्या–प्रतिभुव: ।
विराजन्ते नानाविध–मधुर–रागाकर–भुवां
त्रयाणां ग्रामाणां स्थिति–नियम–सीमान इव ते ॥ 69॥

मृणाली–मृद्वीनां तव भुजलतानां चतसृणां
  चतुर्भिः सौन्दर्यं सरसिजभवः स्तौति वदनैः ।
नखेभ्यः संत्रस्यन् प्रथम–मथना–दन्धकरिपोः
  चतुर्णां शीर्षाणां सम–मभयहस्तार्पण–धिया ॥ 70॥
नखाना–मुद्योतैर्–नवनलिन–रागं विहसतां
  कराणां ते कान्तिं कथय कथयामः कथमुमे ।
कयाचिद्वा साम्यं भजतु कलया हन्त कमलं
  यदि क्रीडल्लक्ष्मी–चरण–तल–लाक्षारस–चणम् ॥ 71॥
समं देवि स्कन्द–द्विपवदन–पीतं स्तनयुगं
  तवेदं नः खेदं हरतु सततं प्रस्नुत–मुखम् ।
यदालोक्याशङ्काकुलित–हृदयो हासजनकः
  स्वकुंभौ हेरंबः परिमृशति हस्तेन झटिति ॥ 72॥
अमू ते वक्षोजा–वमृतरस–माणिक्य–कुतुपौ
  न सन्देहस्पन्दो नगपति–पताके मनसि नः ।
पिबन्तौ तौ यस्मादविदित–वधूसंग–रसिकौ
  कुमारावद्यापि द्विरदवदन–क्रौञ्चदलनौ ॥ 73॥
वहत्यंब स्तंबेरम–दनुज–कुंभ–प्रकृतिभिः
  समारब्धां मुक्तामणिभि–रमलां हारलतिकाम् ।
कुचाभोगो बिंबाधर–रुचिभि–रन्तः शबलितां
  प्रताप–व्यामिश्रां पुरदमयितुः कीर्तिमिव ते ॥ 74॥
तव स्तन्यं मन्ये धरणिधरकन्ये हृदयतः
  पयः पारावारः परिवहति सारस्वतं इव ।

दयावत्या दत्तं द्रविडशिशु–रास्वाद्य तव यत्
कवीनां प्रौढानां–अजनि कमनीयः कवयिता ॥ 75॥
हरक्रोध–ज्वालावलिभि–रवलीढेन वपुषा
गभीरे ते नाभी–सरसि कृतसंगो मनसिजः ।
समुत्तस्थौ तस्माद्–अचलतनये धूमलतिका
जनस्तां जानीते तव जननि रोमावलिरिति ॥ 76॥
यदेतत् कालिन्दी–तनुतर–तरंगाकृति शिवे
कृशे मध्ये किञ्चित् जननि तव यद्भाति सुधियाम् ।
विमर्दा–दन्योन्यं कुचकलशयो–रन्तरगतं
तनूभूतं व्योम प्रविशदिव नाभिं कुहरिणीम् ॥ 77॥
स्थिरो गंगावर्तः स्तन–मुकुल–रोमावलि–लता
कलावालं कुण्डं कुसुमशर–तेजो–हुतभुजः ।
रतेर्–लीलागारं किमपि तव नाभिर्–गिरिसुते
बिलद्वारं सिद्धेः गिरिश–नयनानां विजयते ॥ 78॥
निसर्ग–क्षीणस्य स्तन–तट–भरेण क्लमजुषो
नमन्मूर्तेर्–नारीतिलक शनकै–स्त्रुट्यत इव ।
चिरं ते मध्यस्य त्रुटित–तटिनी–तीर–तरुणा
समावस्था–स्थेंनो भवतु कुशलं शैलतनये ॥ 79॥
कुचौ सद्यः स्विद्यत्–तटघटित–कूर्पासभिदुरौ
कषन्तौ दोर्मूले कनककलशाभौ कलयता ।
तव त्रातुं भंगात्–अलमिति वलग्नं तनुभुवा
त्रिधा नद्धं देवि त्रिवलि लवली–वल्लिभिरिव ॥ 80॥

गुरुत्वं विस्तारं क्षितिधरपतिः पार्वति निजात्
    नितंबा–दाच्छिद्य त्वयि हरणरूपेण निदधे ।
अतस्ते विस्तीर्णो गुरुरय–मशेषां वसुमतीं
    नितंब–प्राग्भारः स्थगयति लघुत्वं नयति च ॥ 81॥
करीन्द्राणां शुण्डान् कनककदली–काण्डपटलीं
    उभाभ्यां–ऊरुभ्यां–उभयमपि निर्जित्य भवती ।
सुवृत्ताभ्यां पत्युः प्रणति–कठिनाभ्यां गिरिसुते
    विधिज्ञे जानुभ्यां विबुध–करिकुंभ–द्वय–मसि ॥ 82॥
पराजेतुं रुद्रं द्विगुणशरगर्भौ गिरिसुते
    निषंगौ जङ्घे ते विषमविशिखो बाढ–मकृत ।
यदग्रे दृश्यन्ते दशशरफलाः पादयुगली
    नखाग्रच्छद्मानः सुर–मकुट–शाणैक–निशिताः ॥ 83॥
श्रुतीनां मूर्धानो दधति तव यौ शेखरतया
    ममाप्येतौ मातः शिरसि दयया देहि चरणौ ।
ययोः पाद्यं पाथः पशुपति–जटाजूट–तटिनी
    ययोर्–लाक्षा–लक्ष्मीः अरुण–हरिचूडामणि–रुचिः ॥ 84॥
नमो वाकं ब्रूमो नयन–रमणीयाय पदयोः
    तवास्मै द्वन्द्वाय स्फुट–रुचि–रसालक्तकवते ।
असूयत्यत्यन्तं यदभिहननाय स्पृहयते
    पशूना–मीशानः प्रमदवन–कङ्केलि–तरवे ॥ 85॥
मृषा कृत्वा गोत्रस्खलन–मथ वैलक्ष्यनमितं
    ललाटे भर्तारं चरणकमले ताडयति ते ।

चिरादन्तः शल्यं दहनकृत–मुन्मूलितवता
तुलाकोटिक्वाणैः किलिकिलित–मीशान–रिपुणा ॥ 86॥
हिमानी–हन्तव्यं हिमगिरि–निवासैक–चतुरौ
निशायां निद्राणां निशि चरमभागे च विशदौ ।
वरं लक्ष्मीपात्रं श्रिय–मतिसृजन्तौ समयिनां
सरोजं त्वत्पादौ जननि जयतश्–चित्रमिह किम् ॥ 87॥
पदं ते कीर्तीनां प्रपदमपदं देवि विपदां
कथं नीतं सद्भिः कठिन–कमठी–कर्पर–तुलाम् ।
कथं वा बाहुभ्यां–उपयमनकाले पुरभिदा
यदादाय न्यस्तं दृषदि दयमानेन मनसा ॥ 88॥
नखैर्–नाकस्त्रीणां करकमल–सङ्कोच–शशिभिः
तरूणां दिव्यानां हसत इव ते चण्डि चरणौ ।
फलानि स्वःस्थेभ्यः किसलय–कराग्रेण ददतां
दरिद्रेभ्यो भद्रां श्रियमनिश–मह्नाय ददतौ ॥ 89॥
ददाने दीनेभ्यः श्रियमनिश–माशानुसदृशीं
अमन्दं सौन्दर्य–प्रकर–मकरन्दं विकिरति ।
तवास्मिन् मन्दार–स्तबक–सुभगे यातु चरणे
निमज्जन् मज्जीवः करणचरणः षट्चरणताम् ॥ 90॥
पदन्यास–क्रीडा–परिचय–मिवारब्धु–मनसः
स्खलन्तस्ते खेलं भवनकलहंसा न जहति ।
अतस्तेषां शिक्षां सुभगमणि–मञ्जीर–रणित:
छलादाचक्षाणं चरणकमलं चारुचरिते ॥ 91॥

गतास्ते मञ्चत्वं द्रुहिण–हरि–रुद्रेश्वर–भृत:
शिव: स्वच्छ–च्छाया–घटित–कपट–प्रच्छदपट: ।
त्वदीयानां भासां प्रतिफलन–रागारुणतया
शरीरी शृंगारो रस इव दृशां दोग्धि कुतुकम् ॥ 92॥
अराला केशेषु प्रकृतिसरला मन्दहसिते
शिरीषाभा चित्ते दृषदुपलशोभा कुचतटे ।
भृशं तन्वी मध्ये पृथु–रुरसिजारोह–विषये
जगत्त्रातुं शंभो: जयति करुणा काचिदरुणा ॥ 93॥
कलङ्क: कस्तूरी रजनिकर–बिम्बं जलमयं
कलाभि: कर्पूरै: मरकतकरण्डं निबिडितम् ।
अतस्–त्वद्भोगेन प्रतिदिनमिदं रिक्तकुहरं
विधिर्–भूयो भूयो निबिडयति नूनं तव कृते ॥ 94॥
पुराराते–रन्त:पुरमसि ततस्–त्वच्चरणयो:
सपर्या–मर्यादा तरलकरणाना–मसुलभा ।
तथा ह्येते नीता: शतमखमुखा: सिद्धिमतुलां
तव द्वारोपान्त–स्थितिभि: अणिमाद्याभि–रमरा: ॥ 95॥
कलत्रं वैधात्रं कति कति भजन्ते न कवय:
श्रियो देव्या: को वा न भवति पति: कैरपि धनै: ।
महादेवं हित्वा तव सति सतीना–मचरमे
कुचाभ्या–मासंग: कुरवक–तरो–रप्यसुलभ: ॥ 96॥
गिरामाहुर्–देवीं द्रुहिणगृहिणी–मागमविदो
हरे: पत्नीं पद्मां हरसहचरी–मद्रितनयाम् ।

तुरीया कापि त्वं दुरधिगम–निस्सीम–महिमा
महामाया विश्वं भ्रमयसि परब्रह्म–महिषि ॥ 97॥
कदा काले मातः कथय कलितालक्तकरसं
पिबेयं विद्यार्थी तव चरण–निर्णेजन–जलम् ।
प्रकृत्या मूकानामपि च कविता–कारणतया
कदाधत्ते वाणी–मुखकमल–ताम्बूल–रसताम् ॥ 98॥
सरस्वत्या लक्ष्म्या विधि–हरि–सपत्नो विहरते
रतेः पातिव्रत्यं शिथिलयति रम्येण वपुषा ।
चिरं जीवन्नेव क्षपित–पशुपाश–व्यतिकरः
परानन्दाभिख्यं रसयति रसं त्वत्–भजनवान्॥ 99॥
प्रदीप–ज्वालाभिः दिवसकर नीराजनविधिः
सुधासूतेः चन्द्रोपल–जललवैर्–अर्घ्यरचना ।
स्वकीयैरंभोभिः सलिलनिधि–सौहित्यकरणं
त्वदीयाभिर्–वाग्भिः तव जननि वाचां स्तुतिरियम् ॥ 100॥